## सप्तमाध्यायस्य
## द्वितीयः पादः

### सिचि वृद्धिः परस्मैपदेषु । (१/२२९७)

परस्मैपदपरे सिचि परतः इगन्तस्याङ्गस्य वृद्धिर्भवति[1] । अचैषीत् । अनैषीत् । अलावीत् । [2]अपावीत् । अकार्षीत् । अहार्षीत् । अन्तरङ्गमपि गुणमेषां वृद्धिर्वचनाद् बाधते । न्यनुवीत्, न्यधुवीत् इत्यत्र कुटादित्वात् ङित्वे सति प्रतिषिद्धायां वृद्धौ उवङादेशः क्रियते । परस्मैपदेषु इति किम् ? अच्योष्ट । अप्लोष्ट ॥

### अतो लरान्तस्य । (२/२३३०)

[3]रेफलकारौ यावतः [4]अन्तौ समीपौ तदन्तस्याङ्गस्य अत एव स्थाने वृद्धिः भवति[5] । क्षर – अक्षारीत् । त्सर – अत्सारीत् । ज्वल – अज्वालीत् । ह्मल – अह्मालीत्[6] । 'अतो हलादेर्लघोः' (७.२.७/२२८४) इति विकल्पस्य अयमपवादः । अतः इति किम् ? न्यखोरीत् । न्यमीलीत् । लरान्तस्य इति किम् ? मा भवान् अटीत् । मा भवानशीत् । अन्तग्रहणं किम् ? अवभ्रीत् । अश्वल्लीत् । अत्र यौ रेफलकारौ [7]अङ्गस्यान्तौ न तावतः समीपौ[8] ॥

### वदव्रजहलन्तस्याचः । (३/२२६७)

वदव्रजोः [9]हलन्तानां च अङ्गानामचः स्थाने वृद्धिर्भवति सिचि परस्मैपदे परतः । अवादीत् । अव्राजीत् । विकल्पबाधनार्थं वदिव्रजिग्रहणम् । हलन्तानाम् – अपाक्षीत् । [10]अभैत्सीत् । अच्छैत्सीत् । अरौत्सीत्[11] ।

अत्र योगविभागे सति हलन्तग्रहणमन्तरेणापि सिध्यति । कथम् ? वदिव्रज्योः इत्यत्र प्रथमयोगे अतः इति स्थानी अनुवर्तते[12], ततो यत् अचः इति [13]सूत्रं तत्राङ्गेन अज्विशेष्यते, अङ्गस्य अचः सिचि परतः वृद्धिर्भवति । तदेतद्धल्ग्रहणं हल्समुदायपरिग्रहार्थम् । इहापि स्यात्, अराङक्षीत्, असाङक्षीत् । अन्यथा हि येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् इत्येकेन[14] वर्णेन व्यवधाने स्यात्, अनेकेन हला[15] न स्यात् । उदवोढाम्, उदवोढम् [16]इत्यत्र वहेः सिचि ढत्वसलोपादीनाम् 'पूर्वत्रासिद्धम्' (८.२.१/१२) इत्यसिद्धत्वात् पूर्वं हलन्तलक्षणा वृद्धिः क्रियते, पश्चाद् ढलोपनिमित्तमोत्वम् । तत्र कृते पुनर्वृद्धिर्न भवति, कृतत्वात् । यत्र त्वकृता वृद्धिः, ओकारस्य एव तत्र भवति, सोढामित्रस्य अपत्यम् सौढामित्रिः [17]इति ॥

### नेटि । (४/२२६८)

[18]इडादौ सिचि[19] हलन्तस्याङ्गस्य वृद्धिर्न भवति । अदेवीत् । असेवीत् । अकोषीत् । अमोषीत् । हलन्तस्य इत्येव, अलावीत्[20] । ननु [21]च एतदप्यन्तरङगत्वात् गुणावादेशयोः कृतयोः हलन्तं भवति ? नैतदेवम् । अन्तरङगमपि गुणं वचनारम्भसामर्थ्यात् सिचि वृद्धिर्बाधते इत्युक्तम् ॥

---

1. गुणस्यापवादः इत्यधिकम् ब. ई ड. इ. 2. अपावीत् नास्ति ब. ड. 3. समीपवचनोऽयमन्तशब्दः इत्यधिकम् क. 4. अन्तौ नास्ति ड. ह. 5. परस्मैपदे परे सिचि परतः इत्यधिकम् क. ड. ई. इ. ब. 6. ह्वल अह्वालीत् इत्यधिकम् ई. इ. 7. अन्तस्थाने गतौ ह. 8. भवतः इत्यधिकम् क. 9. हलन्तस्याचः क. 10. अभैक्षीत् ब. 11. अताप्सीत् अत्राप्सीत् इत्यधिकम् क. 12. अतः स्थाने इत्यधिकम् ब. 13. द्वितीयम्, द्वितीयो योगः इ. 14. एव इत्यधिकम् क. 15. व्यवधानम् इत्यधिकम् क. ई. 16. अत्र नास्ति क. 17. इति नास्ति ब. 18. पूर्वेण हलन्तलक्षणा वृद्धिर्न भवति इत्यधिकम् ड. 19. परस्मैपदपरे इत्यधिकम् ई. ह. 20. अपावीत् इत्यधिकम् क. इ. ड. 21. चात्र क.